# ॥ वाल्मीकि रामायण ॥

## ७ उत्तरकाण्ड

### अध्याय ७८

तच्छ्रुत्वा लक्ष्मणेनोक्तं वाक्यं वाक्यविशारदः ।
प्रत्युवाच महातेजाः प्रहसन्राघवो वचः ॥ १॥

एवमेतन्नरश्रेष्ठ यथा वदसि लक्ष्मण ।
वृत्रघातमशेषेण वाजिमेधफलं च यत् ॥ २॥

श्रूयते हि पुरा सौम्य कर्दमस्य प्रजापतेः ।
पुत्रो बाह्लीश्वरः श्रीमानिलो नाम सुधार्मिकः ॥ ३॥

स राजा पृथिवीं सर्वां वशे कृत्वा महायशाः ।
राज्यं चैव नरव्याघ्र पुत्रवत्पर्यपालयत् ॥ ४॥

सुरैश्च परमोदारैर्दैतेयैश्च महासुरैः ।
नागराक्षसगन्धर्वैर्यक्षैश्च सुमहात्मभिः ॥ ५॥

पूज्यते नित्यशः सौम्य भयार्तै रघुनन्दन ।
अबिभ्यंश्च त्रयो लोकाः सरोषस्य महात्मनः ॥ ६॥

स राजा तादृशो ह्यासीद्धर्मे वीर्ये च निष्ठितः ।
बुद्ध्या च परमोदारो बाह्लीकानां महायशाः ॥ ७॥

स प्रचक्रे महाबाहुर्मृगयां रुचिरे वने ।
चैत्रे मनोरमे मासि सभृत्यबलवाहनः ॥ ८॥

प्रजघ्ने स नृपोऽरण्ये मृगाञ्शतसहस्रशः ।
हत्वैव तृप्तिर्नाभूच्च राज्ञस्तस्य महात्मनः ॥ ९॥

नानामृगाणामयुतं वध्यमानं महात्मना ।
यत्र जातो महासेनस्तं देशमुपचक्रमे ॥ १०॥

तस्मिंस्तु देवदेवेशः शैलराजसुतां हरः ।
रमयामास दुर्धर्षैः सर्वैरनुचरैः सह ॥ ११॥

कृत्वा स्त्रीभूतमात्मानमुमेशो गोपतिध्वजः ।
देव्याः प्रियचिकीर्षुः स तस्मिन्पर्वतनिर्झरे ॥ १२॥

ये च तत्र वनोद्देशे सत्त्वाः पुरुषवादिनः ।
यच्च किं चन तत्सर्वं नारीसंज्ञं बभूव ह ॥ १३॥

एतस्मिन्नन्तरे राजा स इलः कर्दमात्मजः ।
निघ्नन्मृगसहस्राणि तं देशमुपचक्रमे ॥ १४॥

स दृष्ट्वा स्त्रीकृतं सर्वं सव्यालमृगपक्षिणम् ।
आत्मानं सानुगं चैव स्त्रीभूतं रघुनन्दन ॥ १५॥

तस्य दुःखं महत्त्वासीद्दृष्ट्वात्मानं तथा गतम् ।
उमापतेश्च तत्कर्म ज्ञात्वा त्रासमुपागमत् ॥ १६॥

ततो देवं महात्मानं शितिकण्ठं कपर्दिनम् ।
जगाम शरणं राजा सभृत्यबलवाहनः ॥ १७॥

ततः प्रहस्य वरदः सह देव्या महायशाः ।
प्रजापतिसुतं वाक्यमुवाच वरदः स्वयम् ॥ १८॥

उत्तिष्ठोत्तिष्ठ राजर्षे कार्दमेय महाबल ।
पुरुषत्वमृते सौम्य वरं वरय सुव्रत ॥ १९॥

ततः स राजा शोकार्ताः प्रत्याख्यातो महात्मना ।
न स जग्राह स्त्रीभूतो वरमन्यं सुरोत्तमात् ॥ २०॥

ततः शोकेन महता शैलराजसुतां नृपः ।
प्रणिपत्य महादेवीं सर्वेणैवान्तरात्मना ॥ २१॥

ईशे वराणां वरदे लोकानामसि भामिनि ।
अमोघदर्शने देवि भजे सौम्ये नमोऽस्तु ते ॥ २२॥

हृद्गतं तस्य राजर्षेर्विज्ञाय हरसंनिधौ ।
प्रत्युवाच शुभं वाक्यं देवी रुद्रस्य संमता ॥ २३॥

अर्धस्य देवो वरदो वरार्धस्य तथा ह्यहम् ।
तस्मादर्धं गृहाण त्वं स्त्रीपुंसोर्यावदिच्छसि ॥ २४॥

तदद्भुततमं श्रुत्वा देव्या वरमनुत्तमम् ।
सम्प्रहृष्टमना भूत्वा राजा वाक्यमथाब्रवीत् ॥ २५॥

यदि देवि प्रसन्ना मे रूपेणाप्रतिमा भुवि ।

मासं स्त्रीत्वमुपासित्वा मासं स्यां पुरुषः पुनः ॥ २६ ॥

ईप्सितं तस्य विज्ञाय देवी सुरुचिरानना ।
प्रत्युवाच शुभं वाक्यमेवमेतद्भविष्यति ॥ २७ ॥

राजन्पुरुषभूतस्त्वं स्त्रीभावं न स्मरिष्यसि ।
स्त्रीभूतश्चापरं मासं न स्मरिष्यसि पौरुषम् ॥ २८ ॥

एवं स राजा पुरुषो मामं भूत्वाथ कार्दमिः ।
त्रैलोक्यसुन्दरी नारी मासमेकमिलाभवत् ॥ २९ ॥

---

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

---

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

---

Last updated on March 26, 1998; Send corrections to sanskrit@cheerful.com